Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथान्नपूर्णेश्वरीमन्त्र उच्यते —

वैश्रवणऋषिः । अनुष्टुप् छन्दः । अन्नप्रदायिके भूश्रियौ देवते । ग्लौं बीजम् । श्रीं शक्तिः । ग्लां श्रां अन्नं मह्यं हृत् । ग्लीं श्रीं अन्नं मे देहि शिरः । इत्यादियुक्तं अन्नाधिपतये शिखा । ममान्नं प्रदापय कवचम् । स्वाहा अस्त्रम् ॥ ध्यानम् —

दुग्धाब्धौ रूप्यवप्रावृतकनकमयद्वीपवर्ये सुराढ्ये
कल्पद्रूद्यानकाधो मणिमयलसिते विष्टपस्याग्रभागे ।
आसीने भूश्रियौ वाञ्छितवसुनिचयं मन्त्रिणे संसृजन्त्यौ
मन्त्री सञ्चिन्तयानो जपतु दिनमुखे संपदेऽन्नस्य मन्त्रम् ॥

तत्र सुराढ्ये देवैर्निबिडीकृते इत्यर्थः ॥ अन्नं मह्यं अन्नं मे देहि अन्नाधिपतये ममान्नं प्रदापय स्वाहा ॥ अयुतद्वितयं जपेत् ॥ आज्येन च अन्नेन च पृथगेकैकेन च सहस्रं हुनेत् । पुरश्चरणाहोमः । वैष्णवपीठे पूजा । अङ्गैः प्रथमावृतिः । पृथिव्यादिपञ्चभूतैर्द्वितीया । बलाक्यादिभिरेकादशपटले श्रीविधानोक्ताभिः तृतीया । इन्द्रवज्रादिभिरपरे द्वे ॥

अथान्नपूर्णामन्त्रान्तरमुच्यते —

अज ऋषिः । अनुष्टुप् छन्दः । अन्नपूर्णा देवता । ह्रीं बीजम् । स्वाहा शक्तिः । ह्रां हृत् । ह्रीं शिरः । इत्याद्यङ्गानि । ध्यानम् —

रुद्रताण्डवविलोकनलोलां भद्रवक्त्रनयनां भवकान्ताम् ।
अन्नदाननिरतां जननीं तां संस्मरन् जपतु चित्रदुकूलाम् ॥

ओं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा । इति मन्त्रः । उदयकाले षोडशसहस्रं पुरश्चरणाजपः । घृतसिक्तैरन्नैर्दशांशं पुरश्चरणाहोमः । नवमपटले प्रोक्ते शाक्ते पीठे पूजा । अङ्गैः प्रथमावृतिः । मातृभिर्द्वितीया । इन्द्रवज्रादिभिरपरे द्वे ॥

विलसदमृतदृष्ट्या वीक्ष्य विभ्रान्तचित्तं
सकलभुवनमातस्त्राहि मामों नमस्ते ॥ १ ॥

माहेश्वरीमाश्रितकल्पवल्लीमहं भवच्छेदकरीं भवानीम् ।
क्षुधार्तजायातनयाद्युपेतस्त्वामन्नपूर्णे शरणं प्रपद्ये ॥ २ ॥

दारिद्र्यदावानलदह्यमानं त्वाहेऽन्नपूर्णे गिरिराजकन्ये ।
कृपाम्बुदृष्ट्या परिपिञ्च मां त्वं त्वत्पादपद्मार्पितचित्तवृत्तिम् ॥ ३ ॥

इत्यन्नपूर्णास्तुतिबद्धमेतत् श्लोकत्रयं यः पठतीह भक्त्या ।
तस्मै ददात्यन्नसमृद्धिमम्बा श्रियं च विद्यां च यशश्च मुक्तिम् ॥

अथान्नपूर्णामन्त्रप्रसङ्गात अन्नगोपालमन्त्रोपि क्रमदीपिकोक्तप्रकारेण अन्नपूर्णामन्त्रप्रसङ्गात्कल्पान्तरोक्तमन्नपूर्णास्तोत्रमप्यत्र लिख्यते —

भगवति भवरोगात्पीडितं दुष्कृतोत्थात्
सुतदुहितृकलत्रोपद्रवेणानुयातम् ।

लम्बिते बालशयने रुदन्तं वल्लवीजनैः ।
प्रेक्ष्यमाणं दुग्धबुध्या तर्पयेत्सोऽश्नुतेऽशनम् ॥

अन्नरूप रसरूप तुष्टिरूप नमो नमः अन्नाधिपतये ममान्नं प्रयच्छ स्वाहा ॥ इति मन्त्रः ॥ अङ्गेन्द्रवज्रादिभिरावरणत्रयम् ।